# શ્રીવરાહસહસ્રનામસ્તોત્રમ્

shrIvarAhasahasranAmastotram

sanskritdocuments.org

June 21, 2018

# shrIvarAhasahasranAmastotram

# શ્રીવરાહસહસ્રનામસ્તોત્રમ્

## Sanskrit Document Information

Text title : varAhasahasranAmastotram

File name : varAhasahasranAmastotram.itx

Category : sahasranAma, vishhnu, dashAvatAra, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : October 6, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 21, 2018

*sanskritdocuments.org*

# શ્રીવરાહસહસ્રનામસ્તોત્રમ્

શઙ્કર ઉવાચ
યઃ પૂજયેત્પરાત્માનં શ્રીમુષ્ણેશં મહાપ્રભુમ્ ।
વરાહસ્ય સહસ્રેણ નામ્નાં પુષ્પસહસ્રકૈઃ ॥ ૧॥

હતકણ્ટકસામ્રાજ્યં લભાતે નાત્ર સંશયઃ ।
પાર્વત્યુવાચ
કિં તન્નામસહસ્રં મે યેન સામ્રાજ્યમાપ્નુયાત્ ॥ ૨॥

બ્રૂહિ શઙ્કર તત્પ્રીત્યા વરાહસ્ય મહાત્મનઃ ।
શ્રુત્વા વરાહમાહાત્મ્યં ન તૃપ્તિર્જાયતે ક્વચિત્ ॥ ૩॥

કો નુ તૃપ્યેત તનુભૃદ્ગુણસારવિદાં વર ।
શઙ્કર ઉવાચ
શૃણુ દેવિ પ્રવક્ષ્યામિ પવિત્રં મઙ્ગલં પરમ્ ॥ ૪॥

ધન્યં યશસ્યમાયુષ્યં ગોપ્યાદ્ગોપ્યતરં મહત્ ।
ઇદં પુરા ન કસ્યાપિ પ્રોક્તં ગોપ્યં તવાપિ ચ ॥ ૫॥

તથાऽપિ ચ પ્રવક્ષ્યામિ મદઙ્ગાર્ધશરીરિણિ ।
સદાશિવ ઋષિસ્તસ્ય વરાહો દેવતા સ્મૃતઃ ॥ ૬॥

છન્દોऽનુષ્ટુપ્ વિશ્વનેતા કીલકં ચ શરાગ્રભૃત્ ।
હ્રીં બીજમસ્ત્રં ક્લીઙ્કારઃ કવચં શ્રીમિહોચ્યતે ॥ ૭॥

વિશ્વાત્મા પરમો મન્ત્રો મન્ત્રરાજમુદીરયેત્ ।
હુઙ્કારં હૃદયે ન્યસ્ય વરાહાયેતિ મુર્ધનિ ॥ ૮॥

ભૂર્ભુવઃ સ્વઃ શિખાયાં ચ નેત્રયોર્ભૂપતિં ન્યસેત્ ।
સર્વજ્ઞાય નમોऽસ્ત્રં ચ શ્રીં હ્રીં ક્લિં હું ચ ભૂમપિ ॥ ૯॥

હાં હીં હૂં હૈં હૌં હ ઇતિ સ્વીયાઙ્ગુષ્ઠદ્વયાદિકઃ ।

એવં સ્વાઙ્ગકૃતન્યાસો મન્ત્રમેતમુદીરયેત્ ॥ ૧૦॥

નમઃ શ્વેતવરાહાય નમસ્તે પરમાત્મને ।
લક્ષ્મીનાથાય નાથાય શ્રીમુષ્ણ બ્રહ્મણે નમઃ ॥ ૧૧॥

ૐ શ્રીવરાહો ભૂવરાહઃ પરં જ્યોતિઃ પરાત્પરઃ ।
પરમઃ પુરુષઃ સિદ્ધો વિભુર્વ્યોમચરો બલી ॥ ૧૨॥

અદ્વિતીયઃ પરં બ્રહ્મ સચ્ચિદાનન્દવિગ્રહઃ ।
નિર્દ્વન્દ્વો નિરહઙ્કારો નિર્માયો નિશ્ચલોઽમલઃ ॥ ૧૩॥

વિશિખો વિશ્વરૂપશ્ચ વિશ્વદૃગ્વિશ્વભાવનઃ ।
વિશ્વાત્મા વિશ્વનેતા ચ વિમલો વીર્યવર્ધનઃ ॥ ૧૪॥

વિશ્વકર્મા વિનોદી ચ વિશ્વેશો વિશ્વમઙ્ગલઃ ।
વિશ્વો વસુન્ધરાનાથો વસુરેતા વિરોધહૃત્ ॥ ૧૫॥

હિરણ્યગર્ભો હર્યશ્વો દૈત્યારિર્હરિસેવિતઃ ।
મહાતપા મહાદર્શો મનોજ્ઞો નૈકસાધનઃ ॥ ૧૬॥

સર્વાત્મા સર્વવિખ્યાતઃ સર્વસાક્ષી સતાં પતિઃ ।
સર્વગઃ સર્વભૂતાત્મા સર્વદોષવિવર્જિતઃ ॥ ૧૭॥

સર્વભૂતહિતોઽસઙ્ગઃ સત્યઃ સત્યવ્યવસ્થિતઃ ।
સત્યકર્મા સત્યપતિઃ સર્વસત્યપ્રિયો મતઃ ॥ ૧૮॥

આધિવ્યાધિભિયો હર્તા મૃગાઙ્ગો નિયમપ્રિયઃ ।
બલવીરસ્તપઃ શ્રેષ્ઠો ગુણકર્તા ગુણી બલી ॥ ૧૯॥

અનન્તઃ પ્રથમો મન્ત્રઃ સર્વભાવવિદવ્યયઃ ।
સહસ્રનામા ચાનન્તોઽનન્તરૂપો રમેશ્વરઃ ॥ ૨૦॥

અગાધનિલયોઽપારો નિરાકારો નિરાયુધઃ ।
અમોઘદૃગમેયાત્મા વેદવેદ્યો વિશાં પતિઃ ॥ ૨૧॥

વિહૃતિર્વિભવો ભવ્યો ભવહીનો ભવાન્તકઃ ।
ભક્તપ્રિયઃ પવિત્રાઙ્ઘ્રિઃ સુનાસઃ પવનાર્ચિતઃ ॥ ૨૨॥

ભજનીયગુણોઽદૃશ્યો ભદ્રો ભદ્રયશા હરિઃ ।
વેદાન્તકૃદ્વેદવન્દ્યો વેદાધ્યયનતત્પરઃ ॥ ૨૩॥

વેદગોપ્તા ધર્મગોપ્તા વેદમાર્ગપ્રવર્તકઃ ।
વેદાન્તવેદ્યો વેદાત્મા વેદાતીતો જગત્પ્રિયઃ ॥ ૨૪॥

જનાર્દનો જનાધ્યક્ષો જગદીશો જનેશ્વરઃ ।
સહસ્રબાહુઃ સત્યાત્મા હેમાઙ્ગો હેમભૂષણઃ ॥ ૨૫॥

હરિદ(તા)શ્વપ્રિયો નિત્યો હરિઃ પૂર્ણો હલાયુધઃ ।
અમ્બુજાક્ષોઽમ્બુજાધારો નિર્જરશ્ચ નિરઙ્કુશઃ ॥ ૨૬॥

નિષ્ઠુરો નિત્યસન્તોષો નિત્યાનન્દપદપ્રદઃ ।
નિર્જરેશો નિરાલમ્બો નિર્ગુણોઽપિ ગુણાન્વિતઃ ॥ ૨૭॥

મહામાયો મહાવીર્યો મહાતેજા મદોદ્ધતઃ ।
મનોઽભિમાની માયાવી માનદો માનલ(ર)ક્ષણઃ ॥ ૨૮॥

મન્દો માની મનઃ કલ્પો મહાકલ્પો મહેશ્વરઃ ।
માયાપતિર્માનપતિર્મનસઃ પતિરીશ્વરઃ ॥ ૨૯॥

અક્ષોભ્યો બાહ્ય આનન્દી અનિર્દેશ્યોઽપરાજિતઃ ।
અજોઽનન્તોઽપ્રમેયશ્ચ સદાનન્દો જનપ્રિયઃ ॥ ૩૦॥

અનન્તગુણગમ્ભીર ઉગ્રકૃત્પરિવેષ્ટનઃ ।
જિતેન્દ્રિયો જિતક્રોધો જિતામિત્રો જયોઽજયઃ ॥ ૩૧॥

સર્વારિષ્ટાર્તિહા સર્વહૃદન્તરનિવાસકઃ ।
અન્તરાત્મા પરાત્મા ચ સર્વાત્મા સર્વકારકઃ ॥ ૩૨॥

ગુરુઃ કવિઃ કિટિઃ કાન્તઃ કઞ્જાક્ષઃ ખગવાહનઃ ।
સુશર્મા વરદઃ શાર્ઙ્ગી સુદાસાભીષ્ટદઃ પ્રભુઃ ॥ ૩૩॥

ઝિલ્લિકાતનયઃ પ્રેષી ઝિલ્લિકામુક્તિદાયકઃ ।
ગુણજિત્કથિતઃ કાલઃ ક્રોડઃ કોલઃ શ્રમાપહઃ ॥ ૩૪॥

કિટિઃ કૃપાકરઃ સ્વામી સર્વદૃક્સર્વગોચરઃ ।
યોગાચાર્યો મતો વસ્તુ બ્રહ્મણ્યો વેદસત્તમઃ ॥૩૫॥

મહાલમ્બોષ્ઠકશ્ચૈવ મહાદેવો મનોરમઃ ।
ઊર્ધ્વબાહુરિભસ્થૂલઃ શ્યેનઃ સેનાપતિઃ ખનિઃ ॥ ૩૬॥

દીર્ઘાયુઃ શઙ્કરઃ કેશી સુતીર્થો મેઘનિઃસ્વનઃ ।
અહોરાત્રઃ સૂક્તવાકઃ સુહૃન્માન્યઃ સુવર્ચલઃ ॥ ૩૭॥

સારભૃત્સર્વસારશ્ચ સર્વગ્ર(ગ્રા)હઃ સદાગતિઃ ।
સૂર્યશ્ચન્દ્રઃ કુજો જ્ઞશ્ચ દેવમન્ત્રી ભૃગુઃ શનિઃ ॥ ૩૮॥

રાહુઃ કેતુર્ગ્રહપતિર્યજ્ઞભૃદ્યજ્ઞસાધનઃ ।
સહસ્રપાત્સહસ્રાક્ષઃ સોમકાન્તઃ સુધાકરઃ ॥ ૩૯॥

યજ્ઞો યજ્ઞપતિર્યાજી યજ્ઞાઙ્ગો યજ્ઞવાહનઃ ।
યજ્ઞાન્તકૃદ્યજ્ઞગુહ્યો યજ્ઞકૃદ્યજ્ઞસાધકઃ ॥ ૪૦॥

ઇડાગર્ભઃ સ્રવત્કર્ણો યજ્ઞકર્મફલપ્રદઃ ।
ગોપતિઃ શ્રીપતિર્ઘોણસ્ત્રિકાલજ્ઞઃ શુચિશ્રવાઃ ॥ ૪૧॥

શિવઃ શિવતરઃ શૂરઃ શિવપ્રેષ્ઠઃ શિવાર્ચિતઃ ।
શુદ્ધસત્ત્વઃ સુરાર્તિઘ્નઃ ક્ષેત્રજ્ઞોઽક્ષર આદિકૃત્ ॥ ૪૨॥

શઙ્ખી ચક્રી ગદી ખડ્ગી પદ્મી ચણ્ડપરાક્રમઃ
ચણ્ડઃ કોલાહલઃ શાર્ઙ્ગી સ્વયમ્ભૂરગ્ર્યભુગ્વિભુઃ ॥ ૪૩॥

સદાચારઃ સદારમ્ભો દુરાચારનિવર્તકઃ ।
જ્ઞાની જ્ઞાનપ્રિયોઽવજ્ઞો જ્ઞાનદોઽજ્ઞાનદો યમી ॥ ૪૪॥

લયોદકવિહારી ચ સામગાનપ્રિયો ગતિઃ ।
યજ્ઞમૂર્તિસ્ત્રિલોકેશસ્ત્રિધામા કૌસ્તુભોજ્જ્વલઃ ॥ ૪૬॥

શ્રીવત્સલાઞ્છનઃ શ્રીમાન્શ્રીધરો ભૂધરોઽર્ભકઃ ।
વરુણો વારુણો વૃક્ષો વૃષભો વર્ધનો વરઃ ॥ ૪૭॥

યુગાદિકૃદ્યુગાવર્તઃ પક્ષો માસ ઋતુર્યુગઃ ।
વત્સરો વત્સલો વેદઃ શિપિવિષ્ટઃ સનાતનઃ ॥ ૪૮॥

ઇન્દ્રત્રાતા ભયત્રાતા ક્ષુદ્રકૃત્ક્ષુદ્રનાશનઃ ।
મહાહનુર્મહાઘોરો મહાદીપ્તિર્મહાવ્રતઃ ॥ ૪૯॥

મહાપાદો મહાકાલો મહાકાયો મહાબલઃ ।
ગમ્ભીરઘોષો ગમ્ભીરો ગભીરો ઘુર્ઘુરસ્વનઃ ॥ ૫૦॥

ઓઙ્કારગર્ભો ન્યગ્રોધો વષટ્કારો હુતાશનઃ ।
ભૂયાન્બહુમતો ભૂમા વિશ્વકર્મા વિશામ્પતિઃ ॥ ૫૧॥

વ્યવસાયોઽઘમર્ષશ્ચ વિદિતોઽભ્યુત્થિતો મહઃ ।

બલભિદ્બલવાન્દણ્ડી વક્રદંષ્ટ્રો વશો વશી ॥ ૫૨॥

સિદ્ધઃ સિદ્ધિપ્રદઃ સાધ્યઃ સિદ્ધસઙ્કલ્પ ઊર્જવાન્ ।
ધૃતારિરસહાયશ્ચ સુમુખો બડવામુખઃ ॥ ૫૩॥

વસુર્વસુમનાઃ સામશરીરો વસુધાપ્રદઃ ।
પીતામ્બરી વાસુદેવો વામનો જ્ઞાનપઞ્જરઃ ॥ ૫૪॥

નિત્યતૃપ્તો નિરાધારો નિઃસઙ્ગો નિર્જિતામરઃ ।
નિત્યમુક્તો નિત્યવન્દ્યો મુક્તવન્દ્યો મુરાન્તકઃ ॥ ૫૫॥

બન્ધકો મોચકો રુદ્રો યુદ્ધસેનાવિમર્દનઃ ।
પ્રસારણો નિષેધાત્મા ભિક્ષુર્ભિક્ષુપ્રિયો ઋજુઃ ॥ ૫૬॥

મહાહંસો ભિક્ષુરૂપી મહાકન્દો મહાશનઃ ।
મનોજવઃ કાલકાલઃ કાલમૃત્યુઃ સભાજિતઃ ॥ ૫૭॥

પ્રસન્નો નિર્વિભાવશ્ચ ભૂવિદારી દુરાસદઃ ।
વસનો વાસવો વિશ્વવાસવો વાસવપ્રિયઃ ॥ ૫૮॥

સિદ્ધયોગી સિદ્ધકામઃ સિદ્ધિકામઃ શુભાર્થવિત્ ।
અજેયો વિજયીન્દ્રશ્ચ વિશેષજ્ઞો વિભાવસુઃ ॥ ૫૯॥

ઈક્ષામાત્રજગત્સ્રષ્ટા ભ્રૂભઙ્ગનિયતાખિલઃ ।
મહાધ્વગો દિગીશેશો મુનિમાન્યો મુનીશ્વરઃ ॥ ૬૦॥

મહાકાયો વજ્રકાયો વરદો વાયુવાહનઃ ।
વદાન્યો વજ્રભેદી ચ મધુહૃત્કલિદોષહા ॥ ૬૧॥

વાગીશ્વરો વાજસનો વાનસ્પત્યો મનોરમઃ ।
સુબ્રહ્મણ્યો બ્રહ્મધનો બ્રહ્મણ્યો બ્રહ્મવર્ધનઃ ॥ ૬૨॥

વિષ્ટમ્ભી વિશ્વહસ્તશ્ચ વિશ્વાહો વિશ્વતોમુખઃ ।
અતુલો વસુવેગોઽર્કઃ સમ્રાટ્ સામ્રાજ્યદાયકઃ ॥ ૬૩॥

શક્તિપ્રિયઃ શક્તિરૂપો મારશક્તિવિભઞ્જનઃ ।
સ્વતન્ત્રઃ સર્વતન્ત્રજ્ઞો મીમાંસિતગુણાકરઃ ॥ ૬૪॥

અનિર્દેશ્યવપુઃ શ્રીશો નિત્યશ્રીર્નિત્યમઙ્ગલઃ ।
નિત્યોત્સવો નિજાનન્દો નિત્યભેદી નિરાશ્રયઃ ॥ ૬૫॥

અન્તશ્ચરો ભવાધીશો બ્રહ્મયોગી કલાપ્રિયઃ ।
ગોબ્રાહ્મણહિતાચારો જગદ્ધિતમહાવ્રતઃ ॥ ૬૬॥

દુર્ધ્યેયશ્ચ સદાધ્યેયો દુર્વાસાદિવિબોધનઃ ।
દુરાપો દુર્ધિયાં ગોપ્યો દૂરાદ્દૂરઃ સમીપગઃ ॥ ૬૭॥

વૃષાકપિઃ કપિઃ કાર્યઃ કારણઃ કારણક્રમઃ ।
જ્યોતિષાં મથનજ્યોતિઃ જ્યોતિશ્ચક્રપ્રવર્તકઃ ॥ ૬૮॥

પ્રથમો મધ્યમસ્તારઃ સુતીક્ષ્ણોદર્કકાર્યવાન્ ।
સુરૂપશ્ચ સદાવેત્તા સુમુખઃ સુજનપ્રિયઃ ॥ ૬૯॥

મહાવ્યાકરણાચાર્યઃ શિક્ષાકલ્પપ્રવર્તકઃ ।
સ્વચ્છશ્છન્દોમયઃ સ્વેચ્છાસ્વાહિતાર્થવિનાશનઃ ॥ ૭૦॥

સાહસી સર્વહન્તા ચ સમ્મતોઽનિન્દિતોઽસકૃત્ ।
કામરૂપઃ કામપાલઃ સુતીર્થ્યોઽથ ક્ષપાકરઃ ॥ ૭૧॥

જ્વાલી વિશાલશ્ચ પરો વેદકૃજ્જનવર્ધનઃ ।
વેદ્યો વૈદ્યો મહાવેદી વીરહા વિષમો મહઃ ॥ ૭૨॥

ઇતિભાનુર્ગ્રહશ્ચૈવ પ્રગ્રહો નિગ્રહોઽગ્રિહા ।
ઉત્સર્ગઃ સન્નિષેધશ્ચ સુપ્રતાપઃ પ્રતાપધૃત્ ॥ ૭૩॥

સર્વાયુધધરઃ શાલઃ સુરૂપઃ સપ્રમોદનઃ ।
ચતુષ્કિષ્કુઃ સપ્તપાદઃ સિંહસ્કન્ધસ્ત્રિમેખલઃ ॥ ૭૪॥

સુધાપાનરતોઽરિઘ્નઃ સુરમેડ્યઃ સુલોચનઃ ।
તત્ત્વવિત્તત્ત્વગોપ્તા ચ પરતત્ત્વં પ્રજાગરઃ ॥ ૭૫॥

ઈશાન ઈશ્વરોઽધ્યક્ષે મહામેરુરમોઘદૃક્ ।
ભેદપ્રભેદવાદી ચ સ્વાદ્વૈતપરિનિષ્ઠિતઃ ॥ ૭૬॥

ભાગહારી વંશકરો નિમિત્તસ્થો નિમિત્તકૃત્ ।
નિયન્તા નિયમો યન્તા નન્દકો નન્દિવર્ધનઃ ॥ ૭૭॥

ષડ્વિંશકો મહાવિષ્ણુર્બ્રહ્મજ્ઞો બ્રહ્મતત્પરઃ ।
વેદકૃન્નામ ચાનન્તનામા શબ્દાતિગઃ કૃપઃ ॥ ૭૮॥

દમ્ભો દમ્ભકરો દમ્ભવંશો વંશકરો વરઃ ।
અજનિર્જનિકર્તા ચ સુરાધ્યક્ષે યુગાન્તકઃ ॥ ૭૯॥

દર્ભરોમા બુધાધ્યક્ષે માનુકૂલો મદોદ્ધતઃ ।
શન્તનુઃ શઙ્કરઃ સૂક્ષ્મઃ પ્રત્યયશ્ચણ્ડશાસનઃ ॥ ૮૦॥

વૃત્તનાસો મહાગ્રીવઃ કુમ્બુગ્રીવો મહાનૃણઃ ।
વેદવ્યાસો દેવભૂતિરન્તરાત્મા હૃદાલયઃ ॥ ૮૧॥

મહાભાગો મહાસ્પર્શો મહામાત્રો મહામનાઃ ।
મહોદરો મહોષ્ઠશ્ચ મહાજિહ્વો મહામુખઃ ॥ ૮૨॥

પુષ્કરસ્તુમ્બુરુઃ ખેટી સ્થાવરઃ સ્થિતિમત્તરઃ ।
શ્વાસાયુધઃ સમર્થશ્ચ વેદાર્થઃ સુસમાહિતઃ ॥ ૮૩॥

વેદશીર્ષઃ પ્રકાશાત્મા પ્રમોદઃ સામગાયનઃ ।
અન્તર્ભાવ્યો ભાવિતાત્મા મહીદાસો દિવસ્પતિઃ ॥ ૮૪॥

મહાસુદર્શનો વિદ્વાનુપહારપ્રિયોઽચ્યુતઃ ।
અનલો દ્વિશફો ગુપ્તઃ શોભનો નિરવગ્રહઃ ॥ ૮૫॥

ભાષાકરો મહાભર્ગઃ સર્વદેશવિભાગકૃત્ ।
કાલકણ્ઠો મહાકેશો લોમશઃ કાલપૂજિતઃ ॥ ૮૬॥

આસેવનોઽવસાનાત્મા બુદ્ધ્યાત્મા રક્તલોચનઃ ।
નારઙ્ગો નરકોદ્ધર્તા ક્ષેત્રપાલો દુરિષ્ટહા ॥ ૮૭॥

હુઙ્કારગર્ભો દિગ્વાસાઃ બ્રહ્મેન્દ્રાધિપતિર્બલઃ ।
વર્ચસ્વી બ્રહ્મવદનઃ ક્ષત્રબાહુર્વિદૂરગઃ ॥ ૮૮॥

ચતુર્થપાચ્ચતુષ્પાચ્ચ ચતુર્વેદપ્રવર્તકઃ ।
ચાતુર્હોત્રકૃદવ્યક્તઃ સર્વવર્ણવિભાગકૃત્ ॥ ૮૯॥

મહાપતિર્ગૃહપતિર્વિદ્યાધીશો વિશામ્પતિઃ ।
અક્ષરોઽધોક્ષજોઽધૂર્તો રક્ષિતા રાક્ષસાન્તકૃત્ ॥ ૯૦॥

રજઃસત્ત્વતમોહાન્તા કૂટસ્થઃ પ્રકૃતેઃ પરઃ ।
તીર્થકૃત્તીર્થવાસી ચ તીર્થરૂપો હ્યપાં પતિઃ ॥ ૯૧॥

પુણ્યબીજઃ પુરાણર્ષિઃ પવિત્રઃ પરમોત્સવઃ ।
શુદ્ધિકૃચ્છુદ્ધિદઃ શુદ્ધઃ શુદ્ધસત્ત્વનિરૂપકઃ ॥ ૯૨॥

સુપ્રસન્નઃ શુભાર્હોઽથ શુભદિત્સુઃ શુભપ્રિયઃ ।

યજ્ઞભાગભુજાં મુખ્યો યક્ષગાનપ્રિયો બલી ॥ ૯૩॥

સમોઽથ મોદો મોદાત્મા મોદદો મોક્ષદસ્મૃતિઃ ।
પરાયણઃ પ્રસાદશ્ચ લોકબન્ધુર્બૃહસ્પતિઃ ॥ ૯૪॥

લીલાવતારો જનનવિહીનો જન્મનાશનઃ ।
મહાભીમો મહાગર્તો મહેષ્વાસો મહોદયઃ ॥ ૯૫॥

અર્જુનો ભાસુરઃ પ્રખ્યો વિદોષો વિષ્ટરશ્રવાઃ ।
સહસ્રપાત્સભાગ્યશ્ચ પુણ્યપાકો દુરવ્યયઃ ॥ ૯૬॥

કૃત્યહીનો મહાવાગ્મી મહાપાપવિનિગ્રહઃ ।
તેજોઽપહારી બલવાન્ સર્વદાઽરિવિદૂષકઃ ॥ ૯૭॥

કવિઃ કણ્ઠગતિઃ કોષ્ઠો મણિમુક્તાજલાપ્લુતઃ ।
અપ્રમેયગતિઃ કૃષ્ણો હંસશ્ચૈવ શુચિપ્રિયઃ ॥ ૯૮॥

વિજયીન્દ્રઃ સુરેન્દ્રશ્ચ વાગિન્દ્રો વાક્પતિઃ પ્રભુઃ ।
તિરશ્ચીનગતિઃ શુક્લઃ સારગ્રીવો ધરાધરઃ ॥ ૯૯॥

પ્રભાતઃ સર્વતોભદ્રો મહાજન્તુર્મહૌષધિઃ ।
પ્રાણેશો વર્ધકસ્તીવ્રપ્રવેશઃ પર્વતોપમઃ ॥ ૧૦૦॥

સુધાસિક્તઃ સદસ્યસ્થો રાજરાટ્ દણ્ડકાન્તકઃ ।
ઊર્ધ્વકેશોઽજમીઢશ્ચ પિપ્પલાદો બહુશ્રવાઃ ॥ ૧૦૧॥

ગન્ધર્વોઽભ્યુદિતઃ કેશી વીરપેશો વિશારદઃ ।
હિરણ્યવાસાઃ સ્તબ્ધાક્ષો બ્રહ્મલાલિતશૈશવઃ ॥ ૧૦૨॥

પદ્મગર્ભો જમ્બુમાલી સૂર્યમણ્ડલમધ્યગઃ ।
ચન્દ્રમણ્ડલમધ્યસ્થઃ કરભાગગ્નિસંશ્રયઃ ॥ ૧૦૩॥

અજીગર્તઃ શાકલાગ્ર્યઃ સન્ધાનઃ સિંહવિક્રમઃ ।
પ્રભાવાત્મા જગત્કાલઃ કાલકાલો બૃહદ્રથઃ ॥ ૧૦૪॥

સારાઙ્ગો યતમાન્યશ્ચ સત્કૃતિઃ શુચિમણ્ડલઃ ।
કુમારજિદ્વનેચારી સપ્તકન્યામનોરમઃ ॥ ૧૦૫॥

ધૂમકેતુર્મહાકેતુઃ પક્ષિકેતુઃ પ્રજાપતિઃ ।
ઊર્ધ્વરેતા બલોપાયો ભૂતાવર્તઃ સજઙ્ગમઃ ॥ ૧૦૬॥

રવિર્વાયુર્વિધાતા ચ સિદ્ધાન્તો નિશ્ચલોઽચલઃ ।
આસ્થાનકૃદમેયાત્માઽનુકૂલશ્ચાધિકો ભુવઃ ॥ ૧૦૭॥

હ્રસ્વઃ પિતામહોઽનર્થઃ કાલવીર્યો વૃકોદરઃ ।
સહિષ્ણુઃ સહદેવશ્ચ સર્વજિચ્છાત્રુતાપનઃ ॥ ૧૦૮॥

પાઞ્ચરાત્રપરો હંસી પઞ્ચભૂતપ્રવર્તકઃ ।
ભૂરિશ્રવાઃ શિખણ્ડી ચ સુયજ્ઞઃ સત્યઘોષણઃ ॥ ૧૦૯॥

પ્રગાઢઃ પ્રવણો હારી પ્રમાણં પ્રણવો નિધિઃ ।
મહોપનિષદો વાક્ ચ વેદનીડઃ કિરીટધૃત્ ॥ ૧૧૦॥

ભવરોગભિષગ્ભાવો ભાવસાદ્ધ્યો ભવાતિગઃ ।
ષડ્ ધર્મવર્જિતઃ કેશી કાર્યવિત્કર્મગોચરઃ ॥ ૧૧૧॥

યમવિધ્વંસનઃ પાશી યમિવર્ગનિષેવિતઃ ।
મતઙ્ગો મેચકો મેધ્યો મેધાવી સર્વમેલકઃ ॥ ૧૧૨॥

મનોજ્ઞદૃષ્ટિર્મારારિનિગ્રહઃ કમલાકરઃ ।
નમદ્ગણેશો ગોપીડઃ સન્તાનઃ સન્તતિપ્રદઃ ॥ ૧૧૩॥

બહુપ્રદો બલાધ્યક્ષે ભિન્નમર્યાદભેદનઃ ।
અનિર્મુક્તશ્ચારુદેષ્ણઃ સત્યાષાઢઃ સુરાધિપઃ ॥ ૧૧૪॥

આવેદનીયોઽવેદ્યશ્ચ તારણસ્તરુણોઽરુણઃ ।
સર્વલક્ષણલક્ષણ્યઃ સર્વલોકવિલક્ષણઃ ॥ ૧૧૫॥

સર્વદક્ષઃ સુધાધીશઃ શરણ્યઃ શાન્તવિગ્રહઃ ।
રોહિણીશો વરાહશ્ચ વ્યક્તાવ્યક્તસ્વરૂપધૃત્ ॥ ૧૧૬॥

સ્વર્ગદ્વારઃ સુખદ્વારો મોક્ષદ્વારસ્ત્રિવિષ્ટપઃ ।
અદ્વિતીયઃ કેવલશ્ચ કૈવલ્યપતિરર્હણઃ ॥ ૧૧૭॥

તાલપક્ષસ્તાલકરો યન્ત્રી તન્ત્રવિભેદનઃ ।
ષડ્રસઃ કુસુમાસ્ત્રશ્ચ સત્યમૂલફલોદયઃ ॥ ૧૧૮॥

કલા કાષ્ઠા મુહૂર્તશ્ચ મણિબિમ્બો જગદ્ઘૃણિઃ ।
અભયો રુદ્રગીતશ્ચ ગુણજિદ્ગુણભેદનઃ ॥૧૧૯॥

દેવાસુરવિનિર્માતા દેવાસુરનિયામકઃ ।
પ્રારમ્ભશ્ચ વિરામશ્ચ સામ્રાજ્યાધિપતિઃ પ્રભુઃ ॥૧૨૦॥

પણ્ડિતો ગહનારમ્ભઃ જીવનો જીવનપ્રદઃ ।
રક્તદેવો દેવમૂલઃ વેદમૂલો મનઃપ્રિયઃ ॥ ૧૨૧ ॥

વિરાચનઃ સુધાજાતઃ સ્વર્ગાધ્યક્ષો મહાકપિઃ ।
વિરાડૂપઃ પ્રજારૂપઃ સર્વદેવશિખામણિઃ ॥ ૧૨૨ ॥

ભગવાન્ સુમુખઃ સ્વર્ગઃ મઞ્જુકેશઃ સુતુન્દિલઃ ।
વનમાલી ગન્ધમાલી મુક્તામાલ્યચલોપમઃ ॥ ૧૨૩ ॥

મુક્તોઽસૃપ્યઃ સુહૃદ્ભ્રાતા પિતા માતા પરા ગતિઃ ।
સત્વધ્વનિઃ સદાબન્ધુર્બ્રહ્મરુદ્રાધિદૈવતમ્ ॥ ૧૨૪ ॥

સમાત્મા સર્વદઃ સાઙ્ખ્યઃ સન્માર્ગધ્યેયસત્પદઃ ।
સસઙ્કલ્પો વિકલ્પશ્ચ કર્તા સ્વાદી તપોધનઃ ॥ ૧૨૫ ॥

વિરજા વિરજાનાથઃ સ્વચ્છશૃઙ્ગો દુરિષ્ટહા ।
ઘોણો બન્ધુર્મહાચેષ્ટઃ પુરાણઃ પુષ્કરેક્ષણઃ ॥ ૧૨૬ ॥

અહિર્બુધ્ન્યો મુનિર્વિષ્ણુર્ધર્મયૂપસ્તમોહરઃ ।
અગ્રાહ્યશ્શાશ્વતઃ કૃષ્ણઃ પ્રવરઃ પક્ષિવાહનઃ ॥ ૧૨૭ ॥

કપિલઃ ખપથિસ્થશ્ચ પ્રદ્યુમ્નોઽમિતભોજનઃ ।
સઙ્કર્ષણો મહાવાયુસ્ત્રિકાલજ્ઞસ્ત્રિવિક્રમઃ ॥ ૧૨૮ ॥

પૂર્ણપ્રજ્ઞઃ સુધીર્હૃષ્ટઃ પ્રબુદ્ધઃ શમનઃ સદઃ ।
બ્રહ્માણ્ડકોટિનિર્માતા માધવો મધુસૂદનઃ ॥ ૧૨૯ ॥

શશ્વદેકપ્રકારશ્ચ કોટિબ્રહ્માણ્ડનાયકઃ ।
શશ્વદ્ભક્તપરાધીનઃ શશ્વદાનન્દદાયકઃ ॥ ૧૩૦ ॥

સદાનન્દઃ સદાભાસઃ સદા સર્વફલપ્રદઃ ।
ઋતુમાનૃતુપર્ણશ્ચ વિશ્વનેતા વિભૂત્તમઃ ॥ ૧૩૧ ॥

રુક્માઙ્ગદપ્રિયોઽવ્યઙ્ગો મહાલિઙ્ગો મહાકપિઃ ।
સંસ્થાનસ્થાનદઃ સ્રષ્ટા જાહ્નવીવાહધૃક્પ્રભુઃ ॥ ૧૩૨ ॥

માણ્ડુકેષ્ટપ્રદાતા ચ મહાધન્વન્તરિઃ ક્ષિતિઃ ।
સભાપતિસેસિદ્ધમૂલશ્ચરકાદિર્મહાપથઃ ॥ ૧૩૩ ॥

આસન્નમૃત્યુહન્તા ચ વિશ્વાસ્યઃ પ્રાણનાયકઃ ।

બુધો બુધેજ્યો ધર્મેજ્યો વૈકુણ્ઠપતિરિષ્ટદઃ ॥૧૩૪॥

ફલશ્રુતિઃ -
ઇતિ શ્વેતવરાહસ્ય પ્રોક્તં હે ગિરિકન્યકે ।
સમસ્તભાગ્યદં પુણ્યં ભૂપતિત્વપ્રદાયકમ્ ॥૧૩૫॥

મહાપાતકકોટિઘ્નં રાજસૂયફલપ્રદમ્ ।
ય ઇદં પ્રાતરુત્થાય દિવ્યં નામસહસ્રકમ્ ॥૧૩૬॥

પઠતે નિયતો ભૂત્વા મહાપાપૈઃ પ્રમુચ્યતે ।
સહસ્રનામભિર્દિવ્યૈઃ પ્રત્યહં તુલસીદલૈઃ ॥૧૩૭॥

પૂજયેદ્યો વરાહં તુ શ્રદ્ધયા નિશ્ચયાન્વિતઃ ।
એવં સહસ્રનામભિઃ પુષ્પૈર્વાથસુગન્ધિભિઃ ॥૧૩૮॥

અભિજાતકુલે જાતો રાજા ભવતિ નિશ્ચિતમ્ ।
એવં નામસહસ્રેણ વરાહસ્ય મહાત્મનઃ ॥૧૩૯॥

ન દારિદ્ર્યમવાપ્નોતિ ન યાતિ નરકં ધ્રુવમ્ ।
ત્રિકાલમેકકાલં વા પઠન્ નામસહસ્રકમ્ ॥ ૧૪૦॥

માસમેકં જપેન્મર્ત્યો ભવિષ્યતિ જિતેન્દ્રિયઃ ।
મહતીં શ્રિયમાયુષ્યં વિદ્યાં ચૈવાધિગચ્છતિ ॥ ૧૪૧॥

યો વા શ્વેતવરાહસ્ય દિવ્યૈર્નામસહસ્રકૈઃ ।
પ્રવર્તયેન્નિત્યપૂજાં દત્વા નિર્વાહમુત્તમમ્ ॥ ૧૪૨॥

ભવેજ્જન્મસહસ્રૈસ્તુ સામ્રાજ્યાધિપતિર્ધ્રુવમ્ ।
રાત્રૌ શ્વેતવરાહસ્ય સન્નિધૌ ય ઇદં પઠેત્ ॥ ૧૪૩॥

ક્ષયાપસ્મારકુષ્ઠાદ્યૈર્મહારોગૈસ્તથાऽપરૈઃ ।
માસાદેવ વિનિર્મુક્તઃ સ જીવેચ્છરદાં શતમ્ ॥ ૧૪૪॥

સર્વેષુ પુણ્યકાલેષુ પઠન્નામસહસ્રકમ્ ।
સર્વપાપવિનિર્મુક્તો લભતે શાશ્વતં પદમ્ ॥ ૧૪૫॥

સહસ્રનામપઠનાદ્વરાહસ્ય મહાત્મનઃ ।
ન ગ્રહોપદ્રવં યાતિ યાતિ શત્રુક્ષયં તથા ॥ ૧૪૬॥

રાજા ચ દાસતાં યાતિ સર્વે યાન્તિ ચ મિત્રતામ્ ।
શ્રિયશ્ચ સ્થિરતાં યાન્તિ યાન્તિ સર્વેऽપિ સૌહૃદમ્ ॥ ૧૪૭॥

રાજદસ્યુગ્રહાદિભ્યો વ્યાધ્યાધિભ્યશ્ચ કિઞ્ચન ।
ન ભયં જાયતે ક્વાપિ વૃદ્ધિસ્તસ્ય દિને દિને ॥ ૧૪૮॥

વિપ્રસ્તુ વિદ્યામાપ્નોતિ ક્ષત્રિયો વિજયી ભવેત્ ।
વાર્ધુષ્યવિભવં યાતિ વૈશ્યઃ શૂદ્રઃ સુખં વ્રજેત્ ॥ ૧૪૯॥

સકામઃ કામમાપ્નોતિ નિષ્કામો મોક્ષમાપ્નુયાત્ ।
મહારાક્ષસવેતાલભૂતપ્રેતપિશાચકાઃ ॥ ૧૫૦॥

રોગાઃ સર્પવિષાદ્યાશ્ચ નશ્યન્ત્યસ્ય પ્રભાવતઃ ।
ય ઇદં શૃણુયાન્નિત્યં યશ્ચાપિ પરિકીર્તયેત્ ।
નામઙ્ગલમવાપ્નોતિ સોઽમુત્રેહ ચ માનવઃ ॥ ૧૫૧॥

નમઃ શ્વેતવરાહાય નમસ્તે પરમાત્મને ।
લક્ષ્મીનાથાય નાથાય શ્રીમુષ્ણબ્રહ્મણે નમઃ ॥ ૧૫૨॥

યઃ પઠેચ્છૃણુયાન્નિત્યં ઇમં મન્ત્રં નગાત્મજે ।
સ પાપપાશનિર્મુક્તઃ પ્રયાતિ પરમાં ગતિમ્ ॥ ૧૫૩॥

ઇતિ શ્રીવરાહસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIvarAhasahasranAmastotram*

pdf was typeset on June 21, 2018

Please send corrections to *sanskrit@cheerful.com*